माध्यमिक शिक्षा बोर्ड राजस्थान, (अजमेर) बोर्ड परीक्षा 2018

*विशेष विद्यार्थियों हेतु विशेष शिक्षण सामग्री*

कक्षा – 10

विषय – संस्कृत




संरक्षक
नथमल डिडेल (IAS)
निदेशक
मा.शि. राज. बीकानेर

मार्गदर्शक
डॉ. महेन्द्र चौधरी
उपनिदेशक
मा.शि. चूरू संभाग, चूरू

सहमार्गदर्शक
राजकुमार शर्मा
जि.शि.अ. (मा.शि.)झुंझुनू
अमीलाल मूण्ड
अति.जि.शि.अ.(शै.प्र.) झुंझुनू

सहमार्गदर्शक
देवकरण सिंह (प्रधानाचार्य)
राआउमावि बुडाना, झुंझुनू
विनोद कुमार शर्मा (से.नि.व.अ.)
राआउमावि बुडाना, झुंझुनू

संकलनकर्ता
विक्रम सिंह (व्याख्याता)
राआउमावि बिरोल
नवलगढ, झुंझुनू

संकलनकर्ता
सुधा पूनियाँ (व.अ.)
जेकेमोदी राबाउमावि
झुंझुनू

संकलनकर्ता
माया राठौड़ (व.अ.)
राआउमावि, कासिमपुरा
झुंझुनू

टंकणकर्ता
विक्रम सिंह (व्याख्याता)
राआउमावि बिरोल
नवलगढ, झुंझुनू

कार्यालय :– उपनिदेशक माध्य. शिक्षा (परिक्षेत्र चूरू) चूरू
ईमेल–

प्रश्न 1.– अधोलिखितस्य पद्यांशस्यं हिन्दीभाषाया अनुवादं करोतु–

(1) जय–जय हे भगवति सुरभारति ! त्व चरणौ प्रणमामः।

नाद ब्रह्ममयि जय वगीश्वरि ! शरणं ते गच्छामः।।

त्वमसि शरण्या त्रिभुवनध्न्या,

सुर–मुनि–वदन्ति–चरणा।

नवरस–मधुरा कविता–मुखरा,

स्मित–रुचि–रुचिराभरणा।।

हिन्दी अनुवाद– हे भगवती देववाणी सरस्वती! तुम्हारे चरणों में हम प्रणाम करते हैं। हे शब्दब्रह्मावली! हे वाणी की देवी ! तुम्हारी शरण में हम जाते हैं।तुम हमें शरण देने वाली, तीनों लोकों में श्रेष्ठ, देवों और मुनियों द्वारा पूजित चरणों वाली, श्रृंगारादिनवरसों से मधुर, कविता (पद्य) से मुखरित, मंद हँसी युक्त छविरुपी आभूषण वाली हो। तुम्हारी जय–जयकार ।

(2) गायन्ति देवाः किल गीतकानि

धन्यास्तु ते भारतभूमिभागे ।

स्वर्गापवर्गास्पदमार्गभूते

भवन्ति भूयः पुरुषाः सुरत्वात्।।

हिन्दी अनुवाद– विष्णुपुराण के इस श्लोक में लिखा है कि देवगण जिस (धरा) का गुणगान किया करते हैं। स्वर्ग और मोक्ष प्रदान करने वाली भारतभूमि में जन्म लेने वाले वे महापुरूष धन्य हैं जो देवत्व प्राप्त करने के लिए यहाँ बार–बार जन्म लेना चाहते हैं।

(3) अपि स्वर्णमयी लंका न मे लक्ष्मण रोचते।

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।

हिन्दी अनुवाद– हे लक्ष्मण ! सोने से युक्त लंका भी मुझे (राम को) अच्छी नहीं लगती। माता और मातृभूमि स्वर्ग से भी महत्वपूर्ण होती है।

(4) सुभाषितेन गीतेन बालकानां च लीलया।

मनो न भिद्यते यस्य स वै मुक्तोऽथवा पशुः।।

हिन्दी अनुवाद– सुभाषितों के गीतों से और बालकों की लीला से जिसका मन प्रसन्न नहीं होता या तो वह पागल होगा या पशु ही होगा।

(5) प्रियवाक्य प्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।।

हिन्दी अनुवाद– प्रिय वचन बोलने से सभी प्राणी प्रसन्न होते हैं। अतः प्रिय वचन ही बोलने चाहिए। बोलने में क्या कंजूसी(दरिद्रता) ?

(6) अहिंसा परमो धर्मस्तथाऽहिंसा परं तपः।

अहिंसा परमं सत्यं यतो धर्मः प्रवर्तते।।

हिन्दी अनुवाद– अहिंसा (मन–वचन एवं कर्म से किसी भी प्राणी को कष्ट न पहुँचाना) ही सर्वोत्कृष्ट धर्म है तथा अहिंसा ही सबसे श्रेष्ठ तपस्या है। अहिंसा ही सर्वोच्च सत्य है, क्योंकि इसी से धर्म चलता है। धर्म की सर्वोत्कृष्ट आवश्यकता अहिंसा ही है।

(7) गावः प्रसन्नाः मनुजाः प्रसन्नाः देवाः प्रसन्नाः व्रतदानयज्ञैः।

किं नाम तद्यन्न मरौ समृद्धं विद्या–समृद्धो भवता विधेयः।।

हिन्दी अनुवाद– मरूस्थल में गायें प्रसन्न हैं। मनुष्य प्रसन्न हैं, व्रतदान और यज्ञादि कार्यों से देवगण भी सभी प्रसन्न हैं। क्या है ? ऐसा जिससे यह मरूस्थल समृद्ध–सम्पन्न नहीं है? अर्थात् सब प्रकार से सम्पन्न है। आप सभी के द्वारा यह विद्या ज्ञान से भी समृद्ध किया जाना चाहिए।

(8) परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।

www.rajteachers.com

वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्।।

हिन्दी अनुवाद– पीठ पीछे काम बिगाडने वाले तथा सम्मुख पडने पर मधुर वार्तालाप करने वाले मित्र को उसी प्रकार छोड़ देना चाहिए, जिस प्रकार हम जहर भरे पात्र को छोड़ देते हैं जिसके मुख पर दूध लगा हो ।

(9) विद्या विवादाय धनं मदाय

शक्तिः परेषां परिपीडनाय।

खलस्य साधोर्विपरीतमेतत्

ज्ञानाय दानाय च रक्षणाय।।

हिन्दी अनुवाद– दुष्टों और सज्जनों में अन्तर बताते हुए कवि कहता है कि दुष्टों की विद्या विवाद के लिए, धन घमण्ड के लिए तथा शक्ति दूसरों को कष्ट देने के लिए होती है। इसके ठीक विपरीत सज्जनों की विद्या ज्ञान प्रदान करने के लिए, धन दान देने के लिए तथा शक्ति दुर्बलों की रक्षा करने के लिए होती है।

(10) ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनो नित्यशंकितः।

परभाग्योपजीवी च षडेते दुःख– भागिनः।।

हिन्दी अनुवाद– छः प्रकार के व्यक्ति दुःख के भागी होते है। जो ईर्ष्यावान, घृणा करने वाला, असंतोषी, क्रोधी, हमेशा संदेह करने वाला, दूसरों के भाग्य पर जीवित रहने वाले होते हैं अर्थात् हमें ये छः दोष नहीं रखने चाहिए।

प्रश्न 2. –प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु–

(1) पृथिव्यां त्रीणि रत्नानि  जलमन्नं सुभाषितम् ।

मूढैः पाषाण–खण्डेषु रत्नसंज्ञा विधीयते ।।

(2) प्रियवाक्य प्रदानेन सर्वे तुष्यन्ति जन्तवः ।

तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ।।

(3) धन –धान्य – प्रयोगेषु विद्यायाः संग्रहेषु च ।

आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ।।

(4) परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।

वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ।।

(5) अहिंसा परमो धर्मस्तथाऽहिंसा परं तपः ।

अहिंसा परमं सत्यं यतो धर्मः प्रवर्तते ।।

प्रश्न 3– अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानां उत्तराणि यथानिर्देशं लिखतु।

(क) यदि वयं समाजे राष्ट्रे वा परिवर्तनम् आनेतुम् इच्छामः तर्हि अस्माकं प्रभावः अन्येषाम् उपरि भवेत् । वयं बाह्मवातावरणेन कुप्रभाविताः न स्याम, अपितु वातावरणस्य उपरि अस्माकं प्रभावः स्यात् । अत्र काचित् एका कथा एवमस्ति–

कश्चन कृषकः महिष्याः अस्वास्थय–निवारणाय कञ्चित् पशुवैद्यम् औषधं पृष्टवान् । वैधः गुलिकाः दत्तवान्, किञ्च उक्तावान् यत् एकस्यां नलिकायां गोलिकाः स्थापयित्वा भवान् स्वमुखेन वायुं फूत्करोतु, तदा गुलिकाः महिष्याः उदरं गमिष्यन्ति इति । कृषकः अस्तु इति उक्त्वा गतवान्। दिनद्वयानन्तरं सः वैद्यः तं कृषकं मार्गे अस्वस्थरूपेण गच्छन्तं दृष्टवान् । किं सञ्जातमिति पृष्टे सति सः कृषकः उक्तवान्– तया नलिकया अहं फूत्करोमि ततः पूर्वं महिष्या एव फूत्कृतम्, परिणामतः गुलिकाः मम उदरं गताः । इति । अनया कथ्या बोध्यते यत् बाह्मवातावरणस्य कुप्रभावः येषाम् उपरि न भवति, ते एव सफलाः भवन्ति । नेतारः, मार्गदर्शकाः, समाजशोधकाः च बाह्मं दूषितं वातावरणं परिवर्तयन्ति, न तु स्वयं तेन दूषितेन वातावरणेन प्रभाविताः भवन्ति ।

प्रश्नाः

1. अस्य गद्यावतरणस्य समुचितं शीर्षकं लिखन्तु ।

www.rajteachers.com

2. अस्माकं प्रभावः कुत्र स्यात् ?
3. उपर्युक्ता कथा किं बोधयति ?
4. गुलिकाः कस्य उदरे गताः ?
5. कः कं पृष्टवान् औषधम् ?
6. ''कृषकः अस्तु इति उक्त्वा गतवान्'' –अस्मिन् वाक्ये कर्तृपदम् किमस्ति ?
7. 'अगच्छत्' इति पदस्य समानार्थकं पदं गद्यांशात् अन्विष्य लिखन्तु ।
8. 'नेतुम्' इति पदस्य विलोमपदं गद्यांशात् अन्विष्य लिखन्तु ।

उत्तराणि

1. अस्माकं प्रभावः वातावरणस्योपरि
2. वातावरणस्योपरि, अन्येषाम् उपरि वा
3. यत् बाह्मवातावरणस्य कुप्रभावः येषाम् उपरि न भवति ते एव सफलाः भवन्ति
4. कृषकस्य
5. कृषकः, पशुवैद्यम्
6. कृषकः
7. गतवान्
8. आनेतुम्

(ख) मातृभूमिं प्रति प्रम्णः, त्यागस्य, आत्मोत्सर्गस्य, सर्वस्वार्पणस्य च नैके समुज्ज्वलाः पृष्ठाः राजस्थानस्य इतिहासे मिलन्ति परन्तु 'रातीघाटी' नामकस्य युद्धस्य उल्लेखः राजस्थानस्य इतिहासे लुप्तप्रायः वर्तते । बादशाह बाबर इत्यस्य पुत्रः (हुमायुँः इत्यस्य अनुजः) कामरानः बीकानेरस्य राजा राव जैतसी च – इत्यनयोः द्वयोः मध्ये बीकानेरे घटितं महत्युद्धं भारतीय–शौर्यस्य गौरवशालिनी कथा अस्ति । अस्य युद्धस्य तिथिः 26 ओक्टोबर 1534 ईस्वी इत्यस्ति । भारतं जेतुम् लाहोरात् आगतः कामरानः पलायितः । तस्य शिरस्त्राणं (मुकुटम्) मध्येमार्ग 'छोटड़िया' ग्रामे पतितम् । अद्यापि तन्मुकुटम् तद्ग्रामे सुरक्षितम् अस्ति । अस्य रातीघाटी–युद्धस्य किञ्चिद् विस्तृतं वर्णनं 'बीठू सूजा' इत्यनेन रचिते ' छन्द राव जैतसी रो' इत्यस्मिन् ग्रन्थे वर्तते । अस्य च ग्रन्थस्य उद्धारं डॉ. एल.पी. टैस्सीटोरी अकरोत् ।

प्रश्नाः

1. अस्य अनुच्छेदस्य समीचीनं शीर्षकं लिखन्तु ।
2. रातीघाटी–युद्धं कयोः द्वयोः मध्येऽभवत् ?
3. रातीघाटी–युद्धं कुत्र कदा च घटितम् ?
4. 'छन्द राव जैतसी रो' इत्यस्य लेखकः कः ?
5. गौरवशालिनी कथा–इत्यत्र किं विशेष्यपदं किं च विशेषणपदम् इति लिख्यताम् ।
6. 'धावितः' इत्यस्य पर्यायवाचिनं पदम् अनुच्छेदात् अन्विष्य लिख्यताम् ।

उत्तराणि

1. ऐतिहासिकं रातीघाटी–युद्यम ।
2. कामरानः राव जैतसी च–इत्यनयोः मध्ये ।
3. बीकानेरे, 26 ओक्टोबर् 1534 ए.डी. ।
4. बीठू सूजा ।
5. विशेष्यपदम्–कथा । विशेषणपदम्–गौरवशालिनी।
6. पलायितः ।

(ग) डॉ. भीमराव–आम्बेडकरः संस्कृतं पठितुम् इष्टवान् आसीत्, परन्तु सः अस्पृश्यः इति कारणतः कश्चन संस्कृतज्ञः आम्बेडकरं संस्कृतं पाठयितुं निराकृतवान्–इति विषयः तु आम्बेडकर–महोदयस्य जीवनसम्बन्धि–पुस्तकेषु लिखितः अस्तिः, सः विषयः तु प्रचारे अपि अस्ति । 'भारतस्य राजभाषा संस्कृतं भवेत्' इति संविधानसभायां संशोधन–प्रस्तावः आनीतः आसीत्, यस्य प्रस्तावस्य हस्ताक्षर–कर्तृषु प्रस्तावोपस्थापकेषु च डॉ. आम्बेडकरः अपि अन्यतमः आसीत् । अयं विषयः अपि कतिपयवर्षेभ्यः पूर्व ज्ञातः आसीत् । परम् इदानीं कश्चन नूतनः विषयः प्रकाशम् आगतः अस्ति । नवप्राप्त–प्रमाणैः ज्ञायते यत् डॉ. आम्बेडकरः न केवलं संस्कृतस्य राजभाषात्वं समर्थितवान्, न केवलं सः संस्कृतं स्म, अपितु सः संस्कृतेन भाषते स्म इति । यतः संविधानसभायां यदा राजभाषा–सम्बन्धे चर्चा प्रवर्तते स्म तदा डॉ. आम्बेडकरः पण्डितलक्ष्मीकान्त–मैत्रेण सह संस्कृतेन वार्तालापं कृतवान । तत्सम्बन्धे तत्कालीनेषु वार्तापत्रेषु प्रमुखतया वार्ताः प्रकाशिताः आसन् ।

प्रश्नाः

www.rajteachers.com

1. उपर्युक्त–गद्यांशस्य उपयुक्तं शीर्षकं लिखन्तु ।
2. डॉ. भीमराव आम्बेडकरः कां भाषां भारतस्य राजभाषां कर्तुम् इष्टवान् ?
3. डॉ. आम्बेडकरः संविधान–सभायां केन सह संस्कृतेन वार्तालापं कृतवान् ?
4. 'वार्तापत्रेषु वार्ताः प्रकाशिताः आसन्'–इत्यस्मिन् वाक्ये कर्तृपदस्य, क्रियापदस्य, विशेषणस्य च निर्देशः करणीयः ।
5. डॉ. आम्बेडकरः संस्कृतेन भाषते स्म– अत्र रेखाङ्कितस्य संज्ञापदस्य स्थाने सर्वनाम–पदस्य प्रयोगः कर्त्तव्यः ।
6. 'पुरातनः' इति पदस्य विलोमपदं पाठात् चित्वा लिखन्तु ।

उत्तराणि

1. संस्कृतभाषी डॉ. आम्बेडकरः।
2. संस्कृत – भाषाम् ।
3. पण्डित लक्ष्मीकान्त – मैत्रेण सह
4. कर्तृपदम् – वार्ताः
   क्रियापदम् – आसन्
   विशेषणपदम् – प्रकाशिताः
5. सः संस्कृतेन भाषते स्म ।
6. नूतनः

(घ) इदं हि विज्ञानप्रधानं युगम् । ' विशिष्टं ज्ञानं विज्ञानम्' इति कथ्यते । अस्यां शताब्द्यां सर्वत्र विज्ञानस्यैव प्रभावो दरीदृश्यते । अधुना नहि तादृशं किमपि कार्यं यत्र विज्ञानस्य साहायं नापेक्ष्यते । आवागमने, समाचारप्रेषणे, दूरदर्शने, सम्भाषणे, शिक्षणे, चिकित्साक्षेत्रे, मनोरंजनकार्ये, अन्नोत्पादने, वस्त्रनिर्माणे, कृषिकर्मणि तथैवान्यकार्यकलापेषु विज्ञानस्य प्रभावस्तदपेक्षा च सर्वत्रैवानुभूयते ।

सम्प्रति मानवः प्रकृतिं वशीकृत्य तां स्वेच्छया कार्येषु नियुङ्क्ते । तथाहि वैज्ञानिकैरने के आविष्काराः विहिताः । मानवजातेः हिताहितम् अपश्यद्भिः वैज्ञानिकैः राजनीतिविज्ञैर्वा परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः । तदुत्पादितं च लोकध्वंसकार्यम् अतिघोरं निर्घृणं च । अयं च न विज्ञानस्य दोषः न वा परमाणुशक्तेरपराधः, पुरूषापराधः खलु एषः ।

अतोऽस्य मानवकल्याणार्थमेव प्रयोगः करणीय ।

प्रश्नाः

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ।
2. इदं युगं कीदृशम् ?
3. विज्ञानम् किम् अस्ति ?
4. कैः आविष्काराः विहिताः ?
5. परमाणुशक्तेः कस्मिन् उपयोगो विहितः ?
6. कः पुरूषापराधः ?
7. इदं हि विज्ञानप्रधानं युगम् – अस्मिन् वाक्ये विशेषण–विशेष्य–सर्वनामपदानां निर्देशः कर्त्तव्यः ।
8. अस्य मानवकल्याणार्थम् एव प्रयोगः करणीयः–अस्मिन् वाक्ये रेखांक्तिसर्वनामपदस्य स्थाने संज्ञापदस्य प्रयोगं कुर्वन्तु ।
9. वैज्ञानिकैः उपयोगः विहितः – अत्र कः कर्त्ता ?

उत्तराणि

1. विज्ञानस्य महत्वम् ।
2. विज्ञानप्रधानम् युगम् ।
3. 'विशिष्टं ज्ञानं विज्ञानं कथ्यते ।
4. वैज्ञानिकैरने के आविष्काराः विहिताः ।
5. परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः ।
6. परमाणुशक्तेः लोकध्वंसकार्यम् एव।
7. विशेषणम्– विज्ञानप्रधानम्, विशेष्यः – युगम्, सर्वनाम– इदम् ।
8. विज्ञानस्य अथवा परमाणोः
9. वैज्ञानिकैः

(ङ)	यस्मिन् देशे तस्य जनजीवने च न प्रवहित देशभक्तिधारा, न संचरति जन्मभूमि प्रेम, तत्र सामाजिक जीवनं शुष्कं गौरवरहितञ्च मन्यते । इदमेवालक्ष्य अस्माकं देशे प्रत्यहं मातृभूमिस्तुतौ गीयते –

वन्दे मातरम् ।

सुजलां सुफलां मलयजशीतलाम् ।

शस्य–श्यामलां मातरम्, वन्दे मातरम् ।।

वस्तुतोऽस्माकं जन्मभूमिः जन्मनः भूमिः । यथोक्तमपि–'माता भूमिः पुत्रोऽहं पृथिव्याः ।' यथा जननी स्व–स्तन्येन अस्मान् पालयति, तथैव मातृभूमिरपि स्वकीयेन विविधेन वस्तुजातेन स्वाश्रयेण चास्मार्क पालनं रक्षणञ्च करोति । मातुः स्नेहमये उत्सर्गे यथा वयं लालितास्तथैव जन्मभूमेः क्रोडेऽस्माकं वयोवर्धनं भवति । अतः सततमस्माभिः प्राणार्पणेनापि मातृभूमेर्हितसम्पादनं विधेयम् । मातृभूमिहितमेव राष्ट्रियहितं, भारतभूमेश्च गौरवमेव राष्ट्रगौरवमित्यत्र नास्ति विभेदः । अत एव मातृभूमिवात्सल्यं भारतस्य समृद्धयर्थ स्वातंत्रयरक्षणार्थञ्च परमावश्यकम् ।

प्रश्नाः

1. अस्य अनुच्छेदस्य शीर्षकं लिखन्तु ।
2. जननी अस्मान् केन पालयति ?
3. अस्माभिः मातृभूमेः हित–सम्पादनं कथं विधेयम् ?
4. 'अक्ड़े' (गोद में) इत्यस्य पर्यायवाचिनं पदं पाठात् चित्वा लिख्यताम् ।
5. ' सुजलां सुफलां मलयजशीतलां शस्य–श्यामलां वन्दे मातरम्' – अस्मिन् वाक्ये विशेषण–विशेष्य–निर्देश– क्रियताम्।
6. ' अभेदः' इति पदस्य विलोम–पदं (विपरीतार्थकं पदम्) पाठाद् अन्विष्य लिखन्तु ।
7. कर्तृ–क्रियान्वितिं कुर्वन्तु अत्र–
   (क) देशभक्तिधारा – पालयति
   (ख) अस्माभिः – विधेयम्
   (ग) जननी – वन्दे
   (घ) अहम् – प्रवहति
8. ' माता भूमिः पुत्रोऽहम् पृथिव्याः ' – अत्र रेखांक्तिस्य संज्ञापदस्य स्थाने सर्वनामपदस्य प्रयोगं कृत्वा वाक्यं पुनर्लिखन्तु ।

उत्तराणि

1. मातृभूमि–भक्तिः/देशभक्तिः
2. स्व–स्तन्येन
3. प्राणार्पणेन अपि
4. उत्सग्रेः
5. विशेषणपदानि – सुजलां सुफलां, मलयजशीतलां, शस्य–श्यामलाम् ।
   विशेष्य पदम् – मातरम्
6. विभेदः
7. 
   (क) देशभक्तिधारा – प्रवहति
   (ख) अस्माभिः – विधेयम्
   (ग) जननी – पालयति
   (घ) अहम् – वन्दे
8. माताभूमिः पुत्रोऽहम् अस्याः ।

प्रश्न 4.–अधोलिखित प्रश्नान् संस्कृत भाषया एकपदेन उत्तरत –

प्रश्न 1. काव्येषु किं रम्यम् ?
उत्तरम् – नाटकम् ।
प्रश्न 2. कुत्र न रमणीयम् ?
उत्तरम् – भोगभवने ।
प्रश्न 3. मेवाड़ मन्त्री कः आसीतः ?
उत्तरम् – भामाशाहः ।

प्रश्न 4. बालकः सर्वदमनः कस्य सकाशं गन्तुम् इच्छति ?
उत्तरम् –मातुः।
प्रश्न 5. पञ्चतन्त्र केन रचितम् ?
उत्तरम् –पं. विष्णु शर्मणा ।
प्रश्न 6. वेदाः कति सन्ति ?

www.rajteachers.com

उत्तरम् –चत्वारः ।
प्रश्न 7. भारतवर्षस्य उत्तरस्यां दिशि किं वर्तते ?
उत्तरम् –हिमालयः ।
प्रश्न 8. मूर्द कुत्र रत्नसंज्ञा विधीयते ?
उत्तरम् –प्रस्तर खण्डेषु ।
प्रश्न 9. सर्पः केन मार्गण गंगदत्तस्यालयं गतः ?
उत्तरम् –अरधट्टघट्टिकामार्गेण गंगदत्तस्यालयं गतः ।
प्रश्न 10. भामाशाह किं आदाय प्रतापस्य समीपम् आगच्छति ?
उत्तरम् –प्रभूतं धनं।
प्रश्न 11. प्रियदर्शनः कः आसीत् ?
उत्तरम् –सर्पः ।
प्रश्न 12. भिल्लाः किं कर्तुम् उद्यताः भवन्ति ?
उत्तरम् –आत्मबलिदानम् ।
प्रश्न 13. पृथिव्या कियन्ति रत्नानि ? कानि च तानि ?
उत्तरम् –त्रीषि रत्नानि सन्ति (क) – जलम् , (ख)– अन्नम् , (ग)– सुभाषितं च ।
प्रश्न 14. भारत वैभवम् इति पाठः कस्माद् ग्रन्थाद् ग्रहितः
उत्तरम् –भारत–भारती–वैभवम् ।
प्रश्न 15. केशवानन्द इति नामकरणं केन, कुत्र च कृतम्
उत्तरम् –एकेन साधुना, कुम्भमेलायाम् ।
प्रश्न 16. प्रतापस्य राजकाले कः मुगलशासकः आसीत् ?
उत्तरम् –अकबरः ।
प्रश्न 17. सर्पो भूत्वा कः दशति ?
उत्तरम् –अपराजिता औषधिः ।
प्रश्न 18. तापसी केन पदार्थेन निर्मितं मयूरम् आनयति ?
उत्तरम् –मृतिका मयूरम् ।
प्रश्न 19. कं बलवन्तं न बाधते शीतम् ?
उत्तरम् –कम्बलवन्तम् ।
प्रश्न 20. कस्मिन् युद्धे बहुशौर्यं प्रदर्शितवान् ?
उत्तरम् –हल्दीघाटी युद्धे ।
प्रश्न 21. मूर्खाः रत्नानि कुत्र अनिवष्यन्ति ?
उत्तरम् –पाषाणखण्डेषु ।
प्रश्न 22. जयन्तः कस्य सुतः अस्ति ?
उत्तरम् –शक्रस्य ।
प्रश्न 23. वायसस्य नाम किम् ?
उत्तरम् –लघुपतनकः ।
प्रश्न 24. भोजनान्ते किं पेयम् ?
उत्तरम् –तक्रम् ।
प्रश्न 25. समरस्य सारं किम् अस्ति ?
उत्तरम् –रथी ।
प्रश्न 26. 'जाट–प्लेटो' कः कथ्यते ?
उत्तरम् –महाराज सूरजमल्लः ।
प्रश्न 27. केशवानन्देन संस्कृत पाठशाला कुत्र स्थापिता ?
उत्तरम् –अबोहर नगरे ।

प्रश्न 28. आचार्य चरकः कस्य विद्वान आसीत ?
उत्तरम् –शरीरविज्ञानस्य ।
प्रश्न 29. कस्तूरी कस्मात् जायते ?
उत्तरम् –मृगात् ।
प्रश्न 30. केन सह प्रतापस्य अनेकवारं युद्धम् अभवत् ?
उत्तरम् –अकबरस्य सेनया सह ।
प्रश्न 31. कातरः युद्धे किं कुर्यात् ?
उत्तरम् –पलायते ।
प्रश्न 32. कया–विना स्वनिकटस्थमपि राष्ट्रं जनाः पश्यन्ति ?
उत्तरम् –राष्ट्रदृष्टिं विना ।
प्रश्न 33. सरस्वती कां हन्तुम् ?
उत्तरम् –जड़ताम् ।
प्रश्न 34. सीमन्तिनीषु शान्ता का ?
उत्तरम् –सीता ।
प्रश्न 35. सर्वदमनस्य मातुः नाम किमासीत् ?
उत्तरम् –शकुन्तला ।
प्रश्न 36. कः कपोतराजः ?
उत्तरम् –चित्रग्रीवः ।
प्रश्न 37. सर्वदमनस्य मणिबन्धे किम् आबद्ध आसीत् ?
उत्तरम् –रक्षाकरण्डकम् ।
प्रश्न 38. बालकस्य पितुः किं नाम आसीत् ?
उत्तरम् –दुष्यन्तः ।
प्रश्न 39. बालकः कस्य वंशस्य आसीत् ?
उत्तरम् –पुरूवंशस्य ।
प्रश्न 40. करिणां कुलं को हन्ति ?
उत्तरम् –सिंह ।
प्रश्न 41. प्रतापः कुत्र स्वराजधानीम् अकरोत् ?
उत्तरम् –चावण्ड इति स्थाने ।
प्रश्न 42. भामाशाह कः आसीत् ?
उत्तरम् –मेवाडस्य मन्त्री ।
प्रश्न 43. सूरजमलस्य अपरं नाम किम् आसीत् ?
उत्तरम् –सुजान सिंहः ।
प्रश्न 44. गड्गदत्तस्य आश्रयः क्व आसीत् ?
उत्तरम् –पाषाणचयनिबद्धे कूपे आसीत ।
प्रश्न 45. लोकहिताय कदा जागरणीयम् ?
उत्तरम् –अहर्निशम् ।

प्रश्न 5.– अधोलिखितवाक्येषु रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु –

प्रश्न.1. परोपकाराय सतां विभूतयः।

उत्तर कस्मै सतां विभूतयः?

प्रश्न.2. खलस्य विद्याविवादाय भवति।

उत्तर कस्य विद्याविवादाय भवति?

प्रश्न.3. आत्महननं महत्पापम् अस्ति।

उत्तर किं महत्पापम् अस्ति?

प्रश्न.4. तितिराणां विरावः मधुरः।

उत्तर केषां विरावः मधुरः?

प्रश्न.5 गंगदतः कूपे प्रतिवसति स्म।

उत्तर गंगदतः कुत्र प्रतिवसति स्म?

प्रश्न.6. अयंदेशः शुष्कः अपि सरसः।

उत्तर कः देशः शुष्कः अपि सरसः?

प्रश्न.7. महाराणाप्रतापः प्राणैः स्वदेशं रक्षितुम् इच्छति।

उत्तर– महाराणाप्रतापः केन स्वदेशं रक्षितुम् इच्छति?

प्रश्न.8. हिमालयाद समारभ्य इन्दुसरोवरं यावत्।

उत्तर– कस्माद् समारभ्य इन्दुसरोवरं यावत्?

प्रश्न.9. सर्वदमनः दुष्यन्तस्य पुत्रः आसीत्।

उत्तर– सर्वदमनः कस्य पुत्रः आसीत्?

प्रश्न.10. सीता सीमन्तिनीषु शान्ता।

उत्तर– का सीमन्तिनीषु शान्ता?

प्रश्न.11. क्रमेलकानां गतयः।

उत्तर– केषां गतयः?

प्रश्न.12. सुरजमल्लः भारतस्य नायकेषु अन्यतमः आसीत्।

उत्तर– कः भारतस्य नायकेषु अन्यतमः आसीत्?

प्रश्न.13. सत्यं वदेत।

उत्तर– किं वदेत?

प्रश्न.14. मृगात् सिंहः पलायते।

उत्तर–कस्मात् सिंहः पलायते?

प्रश्न.15 कपोतराजः कपोतान् प्रति आह।

उत्तर–कपोत्राजः कान् प्रति आह?

प्रश्न.16. द्रोणःहर्षमुपागतः।

उत्तर– कः हर्षमुपागतः?

प्रश्न.17. भारतदेशः हिमालयेन विभूषितः।

उत्तर–भारतदेशः केन विभूषितः?

प्रश्न.18. सर्वथा अविचारितं कीदृशं कर्मं न कर्त्तव्यम्।

उत्तर–सर्वथा कीदृशं कर्मं न कर्त्तव्यम्?

प्रश्न.19. वयं राष्ट्रदष्टिम् नमस्यामः।

उत्तर–वयं काम् नमस्यामः?

प्रश्न.20. पृथिव्यां त्रीणि रत्नानि सन्ति।

उत्तर–पृथिव्यां कति रत्नानि सन्ति?

प्रश्न.21.भूत्यै न प्रमदितव्यम्।

उत्तर–कस्यै न प्रमदितव्यम्?

प्रश्न.22.सरस्वती त्रिभुवनधन्यां वर्तते।

उत्तर–का त्रिभुवनधन्यां वर्तते?

प्रश्न.23.मम् खलु तातो दुष्यन्तः।

उत्तर–मम् खलु तातो कः?

प्रश्न.24. मय लोकहितं करणीयम्।

उत्तर–मय किं करणीयम्?

प्रश्न.25.व्यवहारे त्यक्तलज्जः सुखी भवेत्।

उत्तर–कस्मिन् त्यक्तलज्जः सुखी भवेत?

प्रश्न.26.महाराणाप्रतापः अरण्ये एकस्यां शिलायाम् उपविष्टः वर्तते।

उत्तर–महाराणाप्रतापः कुत्र उपविष्टः वर्तते।

प्रश्न.27.मरूदेशः चरकेश्वरेण प्रशंसितः।

उत्तर– कः चरकेश्वरेण प्रशंसितः?

प्रश्न.28.प्रदोषे चेतांसि विकसन्ति।

उत्तर–कदा चेतांसि विकसन्ति?

प्रश्न.29. सः कदाचिद् दायादैः उद्वेजितः।

उत्तर–सः कदाचिद् कैः उद्वेजितः?

प्रश्न.30.विश्वसाहित्ये वैदिकसाहित्यस्य महत्वपूर्णं स्थानमस्ति।

उत्तर–विश्वसाहित्ये कस्य महत्वपूर्णं स्थानमस्ति?

31. शस्त्रेण रक्षिते राष्ट्रे शास्त्रचर्चा प्रवर्तते।

उत्तर–केन रक्षिते राष्ट्रे शास्त्रचर्चा प्रवर्तते?

32. जन्मभूमिः स्वर्गादपि गरियसी।

उत्तर–का स्वर्गादपि गरियसी?

33. षडेते दुःख–भागिनः।

उत्तर– कति एते दुःख–भागिनः?

34. वयं राष्ट्रे जागृयाम्।

उत्तर–वयं कुत्र जागृयाम्?

35. विष्णुपदं दुर्लभं प्रोक्तम्।

उत्तर–विष्णुपदं कथं प्रोक्तम्?

प्रश्न 6. –पत्र लेखनम् ।

(1) मित्राय पत्रम्

प्रियमित्र दीपक!

अजयमेरुतः

नमस्ते!

दिनांड्कः ........

अत्र अहं कुशलः, भवतः कुशलतां कामये । अहं मातापितृभ्यां सह अस्मिन् ग्रीष्मावकाशसमये भ्रमणार्थ हिमाचलप्रदेशं गमिष्यामि। भवान् अपि अस्माभिः सह तत्र चलतु इति मम प्रबलच्छा अस्ति । वयं स्र्वे तत्र मिलित्वा आनन्दानुभवं करिष्यामः। मदीयः अयं प्रस्तावः भवते रोचते चेत्, ज्ञापयतु।

परिवारे पूज्येभ्यो सर्वेभ्यो जनेभ्यो मम सादरप्रणामः निवेदनीयः। पत्रस्योत्तरं शीघ्रमेव प्रेषणीयम्।

भवतःमित्रम्

सोहनः

(2) पित्रे पत्रम्

श्रद्धेयेषु पितृचरणेषु,

सादरं प्रणामाः।

अत्रकुशलं तत्रास्तु। भवदीयं स्नेहापूरितं पत्रम् अद्यैव अहं प्राप्तवान्। सम्पूर्ण वृत्तं च ज्ञातवान्। अधुना मम वार्षिकी परीक्षा प्रचलति। परीक्षायाम् इदानीं यावत् सर्वाणि प्रश्नपत्राणि सम्यक् अभवन्।शेषविषयाणां स्थितिः अपि समीचीना वर्तते। आशासे यत् परीक्षायाम् उत्तमान् अड़्ाकन् प्राप्य कक्षायां श्रेष्ठस्थानं प्रास्स्यामि।

परीक्षानन्तरं शीघ्रमेव गृहम् आगमिष्यामि। पूजनीयेषु मातृचरणेषु मम प्रणामः कथनीयः। अनुजाय आशिषः।

भवदाज्ञाकारी पुत्रः

राकेशः

प्रार्थना–पत्र लेखनम्

(1) भवान् दशम्याः कक्षायाः छात्रः महेन्द्रः अस्ति। स्वविद्यालयस्य प्रधानाचार्याय दिनद्वयस्य रुग्णतावकाशार्थ प्रार्थनापत्रं लिखतु।

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः

राजकीयः आदर्श–उच्चमाध्यमिक विद्यालयः,

जयपुरम्(राज.)

विषयः – दिनद्वयस्य रुग्णतावकाशार्थ प्रार्थनापत्रम्।

महोदयाः!

उपर्युक्तविषयान्तर्गते निवेदनम् अस्ति यत् अहं गतदिवसात् अतीव रुग्णेऽस्मि। अतः अहं विद्यालयम् आगस्तुं समर्थः नास्मि।

प्रार्थना अस्ति यत्.................... तः ................... दिनाड्कपर्यन्तं दिनद्वयस्य अवकाशं स्वीकृत्य माम् अनुग्रहीष्यन्ति।

दिनांड्क

........................

भवताम् अज्ञाकारी शिष्यः

www.rajteachers.com

महेन्द्रः

कक्षा–दशमी

(2) शुल्कमुक्त्यर्थं स्वकीयस्य प्रधानाचार्यस्य कृते संस्कृतभाषायां प्रार्थना पत्रम् लिखत।

सेवायाम्,

श्रीमन्तः प्रधानाचार्यः महोदयः,

राजकीयः उ. मा. विद्यालयः,

जयपुरम् (राज.)

विषयः – शुल्कमुक्त्यर्थं प्रार्थना पत्रम् ।

महोदय!

सविनयं नम्र निवेदनमस्ति यत् मम परिवारस्य आर्थिकदशाः दयनीया अस्ति। मम पिता निर्धनः कृषकः अस्ति। मम पठने रूचिः वर्तते, किन्तु विद्यालयस्य शिक्षणशुल्कं दातुं असमर्थो अस्मि। अतः शिक्षण–शुल्कात् मुक्तिं प्रदाय माम् अनुगृह्णन्तु भवन्तः।

दिनांकः .................

भवताम् अज्ञाकारी शिष्यः

ज्ञानेशः

कक्षा–दशमी

प्रश्न 7.– मंजूषातः उपयुक्तपदानि गृहीत्वा संवादं पूरयतु।

(1) पिता– रमेश ! तव.................................... कथं प्रचलति ?

रमेशः– हे पितः ! अध्ययनं तु.............................. प्रचलति।

पिता– कोऽपि विषयः एतादृशः अस्ति यस्मिन् त्वं ...............................अनुभवसि ?

रमेशः– आम्! ................मम स्थितिरः सम्यक् नास्ति। यतोहि अस्माकं विद्यालये इदानीं गणितस्य............

नास्ति।

पिता– त्वं पूर्वं तु माम् अस्मिन् ..........................न उक्तवान।

रमेशः– पूर्वं तु अध्यापक–महोदयः आसीत् परं एकमासात् पूर्वमेव तस्य.....................अन्यत्र अभवत्।

पिता– अस्तु। अहं तव कृते गृहे एव गणिताध्यापकस्य .................................करिष्यामि।

रमेशः– धन्यवादाः।

(उत्तरः– अध्ययनं, समीचीनं, काठिन्यम्, गणिते, अध्यापकः, विषये स्थानान्तरणम्, व्यवस्थाम्)

(2) विनोदः– अंकित! श्वः भवान् कुत्र गमिष्यति ?

अंकितः– अहं.................................. गमिष्यामि ।

विनोदः– तत्र किमपि कार्यं वर्तते ? अथवा...............................एव गच्छति?

अंकितः– कार्यं नास्ति, अहं तु ..........................सह भ्रमणार्थं गच्छामि ।

विनोदः– जयपुरे कुत्र–कुत्र भ्रमणस्य ........................अस्ति ?

अंकितः– वयं तत्र आमेर–दुर्गं, जयगढ़दुर्गं, गोविंददेव–मन्दिरं च......................................।

विनोदः– तत्र नाहरगढ़–दुर्गमपि पश्यतु। तदपि....................................अस्ति।

अंकितः– यदि समयः अवशिष्टः भविष्यति तर्हि निश्चयेन तत्र गमिष्यामः।

www.rajteachers.com

विनोदः– बाढ़म्। मित्र! नमस्ते! इदानीम् अहं गच्छामि। सोमवासरे आवां पुनः मेलिष्यावः। तदा.................
वार्तालापं करिष्यावः।

(उत्तरः– जयपुरं, भ्रमणार्थम्, मित्रैः, कार्यक्रमः, द्रक्ष्यामः, दर्शनीयम्, यात्रानुभवविषये)

(3) अध्यापकः– प्रवीण! त्वम् अत्र किं.........................?

प्रवीणः– हे गुरो! अहम् .......................किमपि न करोमि।

अध्यापकः– तर्हि गच्छ। तव मित्राणि तत्र .................... क्रीडन्ति, तैः सह क्रीड।

प्रवीणः– मम.................................रूचिः नास्ति। अतः अहं न क्रीडामि।

अध्यापकः– स्वस्थशरीरस्य स्वस्थमनसः च कृते क्रीडायाः अस्माकं जीवने महति ................भवति।

प्रवीणः– यदि अहं क्रीडायां ध्यानं दास्यामि तर्हि मम ......................बाधितं भविष्यति।,

अध्यापकः– एतद् समीचीनं नास्ति। क्रीडायै स्वल्पसमयम् एव प्रयच्छ। अल्पसमयः अपि शरीराय ............
प्रदास्यति।

प्रवीणः– ंबाढ़म् श्रीमन्! इतः आरभ्य अहं किञ्चित समयं ..........................अपि दास्यामि।

(उत्तरः– करोषि, अधुना, क्रीडांगणे, क्रीडने, आवश्यकता, अध्ययनं, बहुलाभम्, क्रीडायै।)

(4) माता– राघव! ..................................किं करोषि ?

राघवः– अहं मम.................................गृहकार्यं करोमि।

माता– पुत्र! गृहकार्यान्तरम् .................................गत्वा ततः दुग्धं शाकफलानि च आनय।

राघवः– अहं............................पुस्तकं क्रेतुम् आपणं गमिष्यामि तदा दुग्धं शाकफलानि च आनेष्यामि।

माता– सांयकाले न, त्वंतु पूर्वमेव गत्वा आनय ।

राघवः– शीघ्रं किमर्थम् ?

माता– अद्य तव................................ आगमिष्यति, अतः समयात् पूर्वमेव पक्ष्यामि।

राघवः– मातुलः आगमिष्यति चेत् अहम् इदानीम् एव गत्वा ...........................क्रीत्वा आगच्छामि।

(उत्तरः– त्वं, विद्यालयस्य, आपणं, सांयकाले, मातुलः, भोजनं, वस्तूनि ।)

प्रश्न 8. – अधोलिखितवाक्यानि क्रमरहितानि सन्ति । यथाक्रमं संयोजनं कृत्वा लिखतु ।

(1) क्रमरहितवाक्येषु कथा

(1) घटे जलम् अल्पम् आसीत्।

(2) तस्य मस्तिष्के एकः विचारः समागतः।

(3) एकः पिपासितः काकः आसीत्।

(4) सः पाषाणखण्डानि घटे अक्षिपत्, जलं च उपरि आगतम् ।

(5) सः वने एकं घटम् अपश्यत् ।

(6) जलं पीत्वा काकः ततः अगच्छत्।

कथाक्रम–संयोजनम्

(1) एकः पिपासितः काकः आसीत्।

(2) सः वने एकं घटम् अपश्यत् ।

(3) घटे जलम् अल्पम् आसीत्।

www.rajteachers.com

(4) तस्य मस्तिष्के एकः विचारः समागतः।

(5) सः पाषाणखण्डानि घटे अक्षिपत्, जलं च उपरि आगतम् ।

(6) जलं पीत्वा काकः ततः अगच्छत्।

(2) क्रमरहितवाक्येषु कथा

(1) मूषकः परिश्रमेण जालम् अकृन्तत्।

(2) एकदा सः जाले बद्धः।

(3) सिंहः जालात् – मुक्तः भूत्वा मूषकं प्रशंसन् गतवान्।

(4) एकस्मिन् वने एकः सिंहः वसति स्म।

(5) सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।

(6) तदा तस्य स्वरं श्रुत्वा एकः मूषकः तत्र आगच्छत्।

कथाक्रम–संयोजनम्

(1) एकस्मिन् वने एकः सिंहः वसति स्म।

(2) एकदा सः जाले बद्धः।

(3) सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः।

(4) तदा तस्य स्वरं श्रुत्वा एकः मूषकः तत्र आगच्छत्।

(5) मूषकः परिश्रमेण जालम् अकृन्तत्।

(6) सिंहः जालात् – मुक्तः भूत्वा मूषकं प्रशंसन् गतवान्।

(3) क्रमरहितवाक्येषु कथा

(1) तदा तस्य मुखस्था रोटिका अपि जले पतति।

(2) एकदा कश्चित् कुक्कुरः एकां रोटिकां प्राप्नोत्।

(3) तदा सः नदीजले स्वप्रतिबिम्बम् अपश्यत्।

(4) सः कुक्कुरः रोटिकां प्राप्तुं तेन सः युद्धार्थं मुखम् उद्घाटयति।

(5) सः रोटिकां मुखे गृहीत्वा गच्छन् आसीत्।

(6) स्वप्रतिबिम्बम् अन्यं कुक्कुरं मत्वा सः तस्य रोटिकां प्राप्तुम् अचिन्तयत्।

(7) अत एव कथ्यते 'लोभः न करणीयः।'

कथाक्रम–संयोजनम्

(1) एकदा कश्चित् कुक्कुरः एकां रोटिकां प्राप्नोत्।

(2) सः रोटिकां मुखे गृहीत्वा गच्छन् आसीत्।

(3) तदा सः नदीजले स्वप्रतिबिम्बम् अपश्यत्।

(4) स्वप्रतिबिम्बम् अन्यं कुक्कुरं मत्वा सः तस्य रोटिकां प्राप्तुम् अचिन्तयत्।

(5) सः कुक्कुरः रोटिकां प्राप्तुं तेन सः युद्धार्थं मुखम् उद्घाटयति।

(6) तदा तस्य मुखस्था रोटिका अपि जले पतति।

(7) अत एव कथ्यते 'लोभः न करणीयः।'

(4) क्रमरहितवाक्येषु कथा

(1) सः प्रतिदिनं बहून् पशून् हत्वा खादति।

(2) एकदा यदा शशकस्य क्रमः आगतः, तस्य विलम्बागमनेन सिंहः कुपितः जातः।

(3) सिंहः जले स्वप्रतिबिम्बं दृष्ट्वा तस्मिन् कूपे अकूर्दत्।

(4) कस्मिंश्चित् वने एकः सिंहः वसति स्म।

(5) तदा सर्वे पशवः विचारं कृत्वा प्रतिदिनं सिंहस्य पार्श्वे भोजनार्थम् एकं पशुं प्रेषयितुं निश्चितवन्तः।

(6) तदा चतुरः शशकः सिंहं कूपस्य समीपम् अनयत्।

(7) अतः लोके प्रसिद्धं 'बुद्धिर्यस्य बलं तस्य' इति।

कथाक्रम–संयोजनम्

(1) कस्मिंश्चित् वने एकः सिंहः वसति स्म।

(2) सः प्रतिदिनं बहून् पशून् हत्वा खादति।

(3) तदा सर्वे पशवः विचारं कृत्वा प्रतिदिनं सिंहस्य पार्श्वे भोजनार्थम् एकं पशुं प्रेषयितुं निश्चितवन्तः।

(4) एकदा यदा शशकस्य क्रमः आगतः, तस्य विलम्बागमनेन सिंहः कुपितः जातः।

(5) तदा चतुरः शशकः सिंहं कूपस्य समीपम् अनयत्।

(6) सिंहः जले स्वप्रतिबिम्बं दृष्ट्वा तस्मिन् कूपे अकूर्दत्।

(7) अतः लोके प्रसिद्धं 'बुद्धिर्यस्य बलं तस्य' इति।

प्रश्न 9 – अधोलिखित घटिका चित्रसहायतया रिक्तस्थानेषु अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु।

(क) पंकजः .................... वादने उत्तिष्ठति।

(ख) रमा.....................वादने प्रातः भ्रमणाय गच्छति।

(ग) उमेशः ..................वादने विद्यालयं गच्छति।

(घ) लता ..........................वादने पठति।



(क) सः ................... वादने विद्यालयात् आगच्छति।

(ख) गणेशः .....................वादने क्रीडति।

(ग) कपिला ...................वादने भोजनं करोति।

(घ) रोहनः ..........................वादने शयनं करोति।



(क) दिनेशः .................... वादने उत्तिष्ठति।

(ख) सः .....................वादने मन्दिरं गच्छति।

(ग) उमा .................. वादने पाठं पठति।

www.rajteachers.com

(घ) दीपकः ........................वादने पाठशालायां गच्छति।



(क) बालकः .................... वादने उत्तिष्ठति।

(ख) सः .....................वादने भ्रमणाय गच्छति।

(ग) सुनिलः ..................वादने व्यायामं करोति।

(घ) राजेशः ..........................वादने स्नानादिकं करोति।



–विद्यालयस्य समयसारिणीम् उचित समयवाचकैः पदैः पूरयित्वा लिखत –

७:३० प्रातः प्रातः .....................वादने प्रार्थना।

१०:०० प्रातः प्रातः ..................वादने अर्धावकाशः।

१०:१५ प्रातः प्रातः .....................वादने पंचमः कालांशः।

१२:१५ प्रातः अपराह्णे ..........................वादने पूर्णः अवकाशः।

– दीपावल्युत्सवस्य अधोलिखिते कार्यक्रमे अंकानां स्थाने शब्दैः समयं लिखत।

सायं (७:३०) ................................................ वादने सामुदायिक–भवने आगमनम्।

सायं (८:००) ..........................................वादने कविता पाठः।

रात्रौ (६:१५) ...............................................वादने प्रीतिभोजनम्।

रात्रौ (६:४५) ............................................वादने प्रसादवितरणम्, प्रस्थानम् च।

– अधोलिखितसारिण्याम् अंकानां स्थाने संस्कृतपदैः समयं लिखत–

प्रातः (६:३०) ...................................वादने ईशवन्दना।

प्रातः (७:४५) ........................................वादने उपहारः।

प्रातः (८:१५) ..........................................वादने संस्कृतसम्भाषणाभ्यासः।

प्रातः (११:००) ...............................................वादने वर्तनी–संशोधनम्।

www.rajteachers.com

प्रश्न 10. –मंजूषायां प्रदतैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु।

'सरस्वत्यै नमः'

| क्र.सं. | अव्ययम् | अर्थः | वाक्यम् |
|---|---|---|---|
| 1 | अपि | भी | सः अपि वनं गच्छति । |
| 2 | उच्चैः | जोर से / महत्यर्थे | त्वम् उच्चै हससि। उच्चैः पर्वताः सन्ति । |
| 3 | सहसा | अचानक | मोहनः सहसा एव गृहमागच्छत् । |
| 4 | बहिः | बाहर | ग्रामाद बहिः उद्यानमस्ति । |
| 5 | शनैः | धीरे | सः शनैश्च्लति । |
| 6 | कदा | कब / किस समय | रोहितः कदा पठिष्यति ? |
| 7 | कुतः | कहां से / किस स्थान से | कुतः समायातो योगी ? |
| 8 | अत्र | यहां / इस स्थान पर | अहं अत्र निवसामि । |
| 9 | तत्र | वहां | सः तत्र गत्वा पठति । |
| 10 | श्वः | आने वाला दिन | अहं श्वः पाठं स्मरिष्यामि । |
| 11 | ह्मः | बीता हुआ दिन | अहं ह्मः जयपुरम् अगच्छम् । |
| 12 | पुरा | पूर्वकाल / पहले (प्राचीन काल में) | पुरा एकः हरीशचन्द्रः नाम राजा आसीत । |
| 13 | मा | निषेध अर्थ में (मत) | मा वृथा वद । |
| 14 | विना | अभाव / के बिना | ज्ञानं विना न मुक्तिः । |
| 15 | इतस्ततः | इधर–उधर | वने मृगाः इतस्ततः भ्रमन्ति । |

मञ्जूषायां प्रदतैः अव्ययपदैः रिक्त स्थानानि पुरयित्वा लिखत

प्रश्न 1. पुरा, सहसा, अपि उच्चै

(क) – ....................हसति ।

(ख) –.....................क्रियां न विदधीत ।

(ग) –.................... एकः नृप अभवत् ।

उत्तरम् :– (क) – उच्चै , (ख)– सहसा , (ग)– पुरा

प्रश्न 2. अपि, बहि शन्नैः मा

(क) – सः........................धावति ।

(ख) – ग्रामात् .................. मन्दिरम अस्ति ।

(ग) – असत्यं ....................... वद ।

उत्तरम् :– (क) – अपि , (ख)– बहिः , (ग)– मा

प्रश्न 3. विना, अत्र, तत्र, इतस्ततः

(क) – जलं ....................... जीवनम् असम्भवम् ।

(ख) – .................. तिष्ट्वा पठ ।

(ग) – ....................... मा भ्रमन ।

उत्तरम् :– (क) – विना , (ख)– अत्र , (ग)– तत्र

प्रश्न 4. श्वः, ह्यः, कुतः, उच्चै
(क) – अहं ...................... पाठं पठिष्यामि ।
(ख) – त्व ................. जयपुरं अगच्छ ।
(ग) – ..........................समायातो योगी ।
उत्तरम् :– (क) – श्वः , (ख)– ह्यः , (ग)– कुतः

प्रश्न 5. अपि, उच्चै, कदा, बहिः
(क) – सः क्रीड.ति अहम् ...................... क्रीड़ामि ।
(ख) – सिंहाः ................. गर्जन्ति ।
(ग) – त्वं ...................... कार्यं करोषि ।
उत्तरम् :– (क) – अपि , (ख)– उच्चै , (ग)– कदा

प्रश्न 6. सहसा, बहिः, शन्नैः, अत्र
(क) – ...................... कार्याणि न कुयति ।
(ख) – सः ................. किं करोति स्म ।
(ग) – गरात् ...................... किमर्थं गच्छंति ।
उत्तरम् :– (क) – सहसा , (ख)– अत्र , (ग)– बह्रिः

प्रश्न 7. कदा, श्वः, ह्यः, सहसा
(क) – लता ...................... विद्यालयमं गच्छति ।
(ख) – सः ................. स्वगृहे गमिष्यति ।
(ग) – ...................... किमपि न कुर्यात ।
उत्तरम् :– (क) – कदा , (ख)– श्वः , (ग)– सहसा

प्रश्न 8. हयः, पुरा, मा कुतः
(क) – त्वं ...................... मम गृहे अगच्छ ।
(ख) – ................. उच्चै वदत ।
(ग) – ...................... त्वं इदं पुस्तकं आनय ।
उत्तरम् :– (क) – हयः , (ख)– मा , (ग)– कुतः

प्रश्न 11. –अधोलिखित पदानां प्रकृति–प्रत्ययं पृथक् कृत्वा लिखत–

| शब्द | धातु+प्रत्यय |
|---|---|
| 1. भवितव्यः– | भू+तव्यत् |
| 2. रक्षणीयम्– | रक्ष्+ अनीयर् |
| 3. युध्यमानः– | युध्+ शानच् |
| 4. ज्ञानवान्– | ज्ञान +मतुप् |
| 5. ज्ञानी– | ज्ञान+ इन् |
| 6. वर्णिकः– | वर्ण+ ठन् |
| 7. जडता– | जड+ तल् |
| 8. मूषिका– | मूषक+ टाप् |
| 9. कुमारी– | कुमार+ ड.ीप् |
| 10. लक्षणवती– | लक्षणवत् +ड.ीप् |
| 11. पानीयः– | पा +अनीयर् |
| 12. श्रीमान्– | श्री +मतुप् |
| 13. पशुत्व– | पशु+ त्व |
| 14. पटुता– | पटु +तल् |
| 15. याचमानः– | याच् +शानच् |
| 16. पठन्– | पठ् +शत् |
| 17. लेखितव्यः– | लिख्+ तव्यत् |
| 18. अश्वा– | अश्व+ टाप् |
| 19. कुरूचरी– | कुरूचर +ड.ीप् |
| 20. रमणीयता– | रमणीय +तल् |
| 21. सेवमानः – | सेव +शानच् |
| 22. भाषणीयः – | भाष्+ अनीयर् |
| 23. आयुष्मति – | आयुष् +मतुप् |
| 24. लघुता – | लघु+ तल् |
| 25. क्षुद्रत्व – | क्षुद्र +त्व |
| 26. चटका – | चटक टाप् |
| 27. इन्द्राणी – | इन्द्र+ड.ीप् |
| 28. मन्त्रिणः – | मन्त्र+ इन् |
| 29. गायिका – | गायक+ टाप् |
| 30. वार्षिकी – | वर्ष+ ठक्+ड.ीप् |
| 31. कोकिला – | कोकिल+ टाप् |
| 32. नर्तकी – | नर्तक्+ड.ीप् |
| 33. गुरूत्वम् – | गुरू + त्व |
| 34. सेविका – | सेवक+ टाप् |
| 35. शोभना – | शोभन +टाप् |

प्रकृति प्रत्यय संयांगं कृत्वा पदनिर्माणं कुरूत–

1. पठ् + तव्यत = पठित्व्यः (पु) पठित्व्या (स्त्री) पठित्व्यम् (नपु.)
2. वर्ध् + शानच = वर्धमान
3. भाष् + तव्यत् =भाषितव्य
4. दा +अनीयर् = दानीयम्
5. रूप + मतुप् = रूपवान
6. क्षत्रिय + टाप् = क्षत्रिया
7. दण्डिन + ड़ीप् ( ई) = दण्डिनी
8. क्रोध + इनि (इन्) = क्रोधिन् ( क्रोधी)
9. देव +त्व = देवत्वम्
10. गुरू +तल् (आ) = गुरूता
11. अज + टाप् (आ) = अजा
12. कुमार+ डीप् (ई) = कुमारी
13. यत् + शानच् =यतनामः
14. भू +तव्यत्= भवितव्य (पु) भवितव्या (स्त्री) भवितव्यम् (नपु.)

15. रच् (य)+ तव्यत् = रचयितव्यः,
16. पूज् +अनीयर् = पूजनीयम्
17. गुण्+ मतुप् = गुणवान (पु) गुणवती (स्त्री) गुणवत् (नपु,)
18. दुःख +इन् = दुःखिन् (दुःखी)
19. मनुष्य+त्व = मनुष्यत्वम्
20. कवि+ तल् == कविता
21. ज्येष्ठ + टाप्(आ) = ज्येष्ठा
22. राजन् + डीप् = राज्ञी
23. धन + ठन् (इक) = धनिक (धनिकः)
24. गम् + तव्यत् = गन्तव्यः
25. भक्ष् + अनीयर् = भक्षणीय
26. गुण् + इन् = गुणिन् (गुणीः)
27. वर्ण + ठन् (इक) = वर्णिक ( वर्णिकः)
